दुर्लभं तत्त्वदर्शनम् । दुर्लभा सहजावस्था सद्गुरोः करुणां विना । विविधैरासनैः कुम्भैर्विचित्रकरणैरपि । प्रबुद्धायामादिशक्तौ प्राणः शून्ये विलीयते । उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्म्मणः । योगिनः सहजावस्था स्वयमेव प्रकाशते । सुषुम्णावाहिनि प्राणे शून्ये विशति मारुते । तदा समस्तकर्म्माणि निर्मूलयति कर्मवित् । अमरो निर्मलः शून्यं जगदेतच्चराचरम् । चित्ते समत्वमापन्ने वायुं व्रजति मध्यमे । एषाऽमरोली वज्रोली सहजोली मताऽपि च । ज्ञानं कुतो मनसि जीवति देवि ! तावत् प्राणेऽपि जीवति मनो म्रियते न तावत् । प्राणमनोद्वयमिदं विलयं प्रयाति मोक्षं स गच्छति नरो न कथञ्चिदन्यः । रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः । रसो बद्धो मनो बद्धं किं न सिध्यति भूतले । मूर्च्छितो हरते व्याधिं मृतो जीवयति स्वयम् । बद्धः खेचरतां धत्ते रसो वायुश्च भैरवि ! । इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः । मारुतस्य लयो नाथः स लयो नादमाश्रितः । अयमेव तु मोक्षाख्यो अस्तु वापि मतान्तरे । मनःप्राणलयौ नादमेकीकृत्य प्रवर्त्तते । प्रनष्टोच्छ्वासनिःश्वासप्रध्वस्तविषयग्रहः । निश्चेष्टा निर्विकाराश्च लयं यान्ति च योगिनः । उच्छिन्नसर्वसङ्कल्पो निःशेषाशेषचेष्टितः । स्वावगम्यो लयः कोऽपि मनोवाचामगोचरः । यत्र दृष्टिर्लयस्तत्र भूतेन्द्रियसनातनी । स्यात् शक्तिः सर्वभूतानां दृष्टिर्लक्ष्ये न सङ्कुता । वेदशास्त्रपुराणाद्याः सामान्यगणिका इव । एकैव शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता । एषा तु शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्त्तते दृष्ट्या निश्चलतारया वहिरसौ पश्यन्न पश्यत्यपि । मुद्रेयं खलु शाम्भवी भवति सा युष्मत्प्रसादाद्गुरोः शून्याशून्यविवर्जितं स्फुरति यत्तत्त्वं पदं शाम्भवम् । अर्द्धोद्घाटितलोचनः स्थिरमना नासाग्रदत्तेक्षणः । चन्द्रार्कावपि लीनतामुपनयन्निष्पन्दभावान्तरे । ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परम् तत्त्वं तत्पदमेव वस्तु परमं वाच्यं किमत्राधिकम् । श्रीशाम्भव्याः खेचर्याश्च अवस्थाचलभेदतः । तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद् भ्रुवौ । पूर्वयोगस्य मार्गोऽयमुन्मनीकारकः क्षणः । केचिदागमजालेन केचिन्निगमसङ्कुलाः । केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् । सातावाद्यद्वितीयशिखरे मेरुमूले तदस्ति तत्त्वं चैतत् प्रवदति सुधीः सन्मुखं निम्नगानाम् । चन्द्रात् सारः स्रवति वपुषस्तेन मृत्युर्नराणां बध्नीयात् सुकरणमिदं नान्यथा कार्यसिद्धिः । दिवा न पूजयेल्लिङ्गं रात्रौ नैव प्रपूजयेत् । सततं पूजयेल्लिङ्गं दिवारात्रौ च पूजयेत् । सुषिरं ज्ञानजनकपञ्चस्रोतःसमन्वितम् । तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः । चित्तं चरति खे यस्माज्जिह्वा चरति खे गता । तेनैव खेचरी नाम मुद्रा सिद्धैर्नमस्कृता । इडापिङ्गलयोर्योगे शून्ये चैवानिलं ग्रसेत् । तिष्ठते खेचरी मुद्रा तत्र सत्यं पुनः पुनः । सूर्य्याचन्द्रमसोर्मध्ये निरालम्बे तले पुनः । संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी । सा मयोद्दिता वामा साक्षाच्च शिववल्लभा । पूरयेन्मारुतं दिव्यं सुषुम्णापश्चिमे मुखे । पुरस्ताच्चैव पूर्य्येत निश्चिता खेचरी भवेत् । अभ्यसेत् खेचरीमुद्रामुन्मनी सा प्रजायते । अभ्यसेत् खेचरीं तावद्यावत् स्याद्योगनिद्रितः । संप्राप्तयोगनिद्रस्य कालो नास्ति कदाचन । भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते । ज्ञातव्यं तत्पदं तुर्य्यं तत्र कालो न विद्यते । चन्द्रसूर्य्यद्वयोर्मध्ये मुद्रां दद्याच्च खेचरीम् । निरालम्बे महाशून्ये व्योमचक्रे व्यवस्थिताम् । निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत् । सबाह्याभ्यन्तरे व्योम्नि घटवत् तिष्ठति ध्रुवम् । बाह्यवायुर्यथा लीनः खस्य मध्ये न संशयः । स्वस्थानं गच्छति प्राणः सूर्य्याङ्के पवने तथा । एवमभ्यस्यमानस्य वायुमार्गे दिवानिशम् । अभ्यासाज्जीर्य्यते वायुर्मनस्तत्रैव लीयते । अमृतं प्लावयेद्देहमापादतलमस्तकम् । सिध्यते च महायोगी महाबलपराक्रमः । शक्तिमध्ये मनः कृत्वा मनः शक्तेस्तु मध्यगम् । मनसा चित्तमालोक्य धारयेत् परमं पदम् । खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ! । आत्मानं खमयं कृत्वा न किञ्चिदपि चिन्तयेत् । बाह्यचिन्ता न कर्त्तव्या तथैवान्तरचिन्तनम् । सर्वचिन्तां परित्यज्य न किञ्चिदपि चिन्तयेत । सङ्कल्पमात्रकलनाच्च जगत् समग्रं सङ्कल्पमात्रकलनाद्धि मनोविलीनम् । सङ्कल्पमात्रमिदमुत्सृज निर्विकल्पमाश्रित्य निश्चलमवाप्नुहि सिद्धात्मशान्तिम् । कर्पूरं सलिले यद्वत् सैन्धवं सलिले यथा । तथा सन्धीयमानं च मनस्तत्त्वे विलीयते । ज्ञेयं सर्वप्रतीतञ्च ज्ञानञ्च मन उच्यते । ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः । मनो